শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

## শ্রী গরুডমহাপুরাণে পূর্ৱখণ্ডে

# ॥ শ্রী ৱৈষ্ণৱকৱচম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী ৱৈষ্ণৱকৱচম্ ॥

হরিরুৱাচ
সর্ৱব্যাধিহরং ৱক্ষ্যে ৱৈষ্ণৱং কৱচং শুভম্।
যেন রক্ষা কৃতা শম্ভোর্নাত্র কার্যা ৱিচারণা॥ **1** ॥

প্রণম্য দেৱমীশানমজং নিত্যমনামযম্।
দেৱং সর্ৱেশ্ৱরং ৱিষ্ণুং সর্ৱব্যাপিনমৱ্যযম্॥ **2** ॥

বধ্নাম্যহং প্রতীকারং নমস্কৃত্য জনার্দনম্।
অমোঘাপ্রতিমং সর্ৱং সর্ৱদুঃখনিৱারণম্॥ **3** ॥

ৱিষ্ণুর্মামগ্রতঃ পাতু কৃষ্ণো রক্ষতু পৃষ্ঠতঃ।
হরির্মে রক্ষতু শিরো হৃদযঞ্চ জনার্দনঃ॥ **4** ॥

মনো মম হৃষীকেশো জিহ্ৱাং রক্ষতু কেশৱঃ।
পাতু নেত্রে ৱাসুদেৱঃ শ্রোত্রে সঙ্কর্ষণো ৱিভুঃ॥ **5** ॥

প্রদ্যুম্নঃ পাতু মে ঘ্রাণমনিরুদ্ধস্তু চর্ম চ।
ৱনমালী গলস্যান্তং শ্রীৱৎসো রক্ষতামধঃ॥ **6** ॥

পার্শ্ৱং রক্ষতু মে চক্রং ৱামং দৈত্যনিৱারণম্।
দক্ষিণং তু গদাদেৱী সর্ৱাসুরনিৱারিণী॥ **7** ॥

উদরং মুসলং পাতু পৃষ্ঠং মে পাতু লাঙ্গলম্।
ঊর্ধ্ৱং রক্ষতু মে শার্ঙ্গং জঙ্ঘে রক্ষতু নন্দকঃ॥ **8** ॥

পার্ষ্ণীং রক্ষতু শঙ্খশ্চ পদ্মং মে চরণাৱুভৌ।
সর্ৱকার্যার্থসিদ্ধ্যর্থং পাতু মাং গরুডঃ সদা॥ **9**॥

ৱরাহো রক্ষতু জলে ৱিষমেষু চ ৱামনঃ।
অটৱ্যাং নারসিংহশ্চ সর্ৱতঃ পাতু কেশৱঃ॥ **10**॥

হিরণ্যগর্ভো ভগৱান্ হিরণ্যং মে প্রযচ্ছতু।
সাঙ্খ্যাচার্যস্তু কপিলো ধাতুসাম্যং করোতু মে॥ **11**॥

শ্ৱেতদ্বীপনিৱাসী চ শ্ৱেতদ্বীপং নযত্ৱজঃ।
সর্ৱান্ শত্রূন্ সূদযতু মধুকৈটভসূদনঃ॥ **12**॥

সদাকর্ষতু ৱিষ্ণুশ্চ কিল্বিষং মম ৱিগ্রহাৎ।
হংসো মৎস্যস্তথা কূর্মঃ পাতু মাং সর্ৱতো দিশম্॥ **13**॥

ত্রিৱিক্রমস্তু মে দেৱঃ সর্ৱপাপানি কৃন্ততু।
তথা নারাযণো দেৱো বুদ্ধিং পালযতাং মম॥ **14**॥

শেষো মে নির্মলং জ্ঞানং করোৎৱজ্ঞাননাশনম্।
ৱডৱামুখো নাশযতু কল্মষং যৎকৃতং মযা॥ **15**॥

পদ্ভ্যাং দদাতু পরমং সুখং মূর্ধ্নি মম প্রভুঃ।
দত্তাত্রেযঃ কলযতু সপুত্রপশুবান্ধৱম্॥ **16**॥

সর্ৱানরীন্ নাশযতু রামঃ পরশুনা মম।
রক্ষোঘ্নস্তু দাশরথিঃ পাতু নিত্যং মহাভুজঃ॥ **17**॥

শত্রূন্হলেন মে হন্যাদ্রামো যাদৱনন্দনঃ।
প্রলম্বকেশিচাণূরপূতনাকংসনাশনঃ।
কৃষ্ণস্য যো বালভাৱঃ স মে কামান্প্রযচ্ছতু॥ **18**॥

অন্ধকারতমোঘোরং পুরুষং কৃষ্ণপিঙ্গলম্।
পশ্যামি ভযসন্ত্রস্তঃ পাশহস্তমিৱান্তকম্॥ **19** ॥

ততোঽহং পুণ্ডরীকাক্ষমচ্যুতং শরণং গতঃ।
ধন্যোঽহং নির্ভযো নিত্যং যস্য মে ভগৱান্হরিঃ॥ **20** ॥

ধ্যাৎৱা নারাযণং দেৱং সৰ্ৱোপদ্রৱনাশনম্।
ৱৈষ্ণৱং কৱচং বদ্ধ্ৱা ৱিচরামি মহীতলে॥ **21** ॥

অপ্রধৃষ্যোঽস্মি ভূতানাং সর্ৱদেৱমযো হ্যহম্।
স্মরণাদ্দেৱদেৱস্য ৱিষ্ণোরমিততেজসঃ॥ **22** ॥

সিদ্ধির্ভৱতু মে নিত্যং যথা মন্ত্রমুদাহৃতম্।
যো মাং পশ্যতি চক্ষুর্ভ্যাং যং চ পশ্যামি চক্ষুষা।
সর্ৱেষাং পাপদুষ্টানাং ৱিষ্ণুর্বধ্নাতি চক্ষুষী॥ **23** ॥

ৱাসুদেৱস্য যচ্চক্রং তস্য চক্রস্য যে ৎৱরাঃ।
তে হি ছিন্দন্তু পাপানি মম হিংসন্তু হিংসকান্॥ **24** ॥

রাক্ষসেষু পিশাচেষু কান্তারেষ্ৱটৱীষু চ।
ৱিৱাদে রাজমার্গেষু দ্যূতেষু কলহেষু চ॥ **25** ॥

নদীসন্তারণে ঘোরে সংপ্রাপ্তে প্রাণসংশযে।
অগ্নিচৌরনিপাতেষু সর্ৱগ্রহনিৱারণে॥ **26** ॥

ৱিদ্যুৎসর্পৱিষোদ্ৱেগে
রোগে চ ৱিঘ্নসঙ্কটে।
জপ্যমেতজ্জপেন্নিত্যং
শরীরে ভযমাগতে॥ **27** ॥

অযং ভগৱতো মন্ত্রো মন্ত্রাণাং পরমো মহান্।
ৱিখ্যাতং কৱচং গুহ্যং সর্ৱপাপপ্রণাশনম্।
স্বমাযাকৃতনির্মাণকল্পান্তগহনং মহৎ॥ **28**॥

॥ ইতি শ্রী ৱৈষ্ণৱকৱচং সমাপ্তম্॥